Shri Raghunath Temple MSS. Library,
JAMMU

No. ४७००

Title शत-चण्डी विधान पूजापद्धतिः ।

Author ✗

Extent ३७ पत्राणि Age सं० १७८६

Subject तंत्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

प्रानचण्डीविधानपूजापद्धतिः

४७००

4700

F.=17

© Dharmartha Trust J&K. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ श्रीनवदुर्गायै जयतु ॥ ॥ शतचंडी विधानपूजापद्धतिः ॥
श्रीनगावती महाकाली महालक्ष्मी महासरस्वती नवदुर्गायै नमः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ अथ शतचंडीविधानं ॥ ॥ तत्रोपहाराः ॥ प्राचीसाधनं ॥
ततो दशहस्तस्य वा मंडपनिर्माणं कार्यं ॥ ततो रुद्रयामले उत्तरखंडे देवीचरित्रे ॥
दशाद्वादशहस्तं वा चतुर्द्वारसमुत्तमं ॥ चतुरस्रं पताकाढ्यं मंडपं वेदिभूषितं ॥ षो
डशास्रं तु संयुक्तं पुष्पपल्लवशोभितं ॥ वसुकोणयुतां वेदिं मध्ये कुर्यात्त्रिभागतः ॥
पक्वेष्टकचितां रम्यां मृच्छायेद्धस्तसंमितां ॥ सर्वलक्षणसंपन्नां वेदिं कुर्यान्मनोहरां ॥
पंचवर्णरजोभिश्च कुर्यान्मंडलकं शुभं ॥ सर्वतोभद्रसंज्ञं च मनोहारि सुशोभनं ॥
पंचवर्णवितानं च किंकिणीजालमंडितं ॥ प्रवालैर्मौक्तिकैश्छन्नं बध्नीयाद्वितानमु
त्तं ॥ श्वेतपुष्पैस्तथा रक्तैः पीतैश्चापि सुसंवृतं ॥ नीलोत्पलैः कोकनदैर्भूषितं त्री
फलैस्तथा ॥ आम्रपल्लवमालाभिर्दूर्वाभिर्मंडपं शुभमिति ॥ ततः कुंडं पश्चिम २
तः कार्यं ॥ तदुक्तं देवीचरित्रे ॥ वारुण्यां च प्रकर्तव्यं कुंडं लक्षणलक्षितमिति ॥
तच्च कुंडं द्विहस्तमितं कार्यं ॥ तदुक्तं संग्रहातिकाकृता ॥ चतुरस्रे समे कुंडे

© Dharmartha Trust J&K. Digitized by eGangotri

समंताद्धस्तमेखलके॥ एकावरणसंयुक्ते योनित्यंमंडलमंडिते॥ दशांशवि
धिना होममुक्तद्रव्येण साधयेत्॥ नवदुर्गामखे कुंडमेवं जानीहि सुव्रते॥
नित्यचंडीविधानेपि कुंडमीदृक्प्रकीर्तितं॥ नवचंडीमखे कुंडमीदृग्लक्षण
मुच्यते॥ एतद्विगुणितं कुंडं शतेशतचंड्याः प्रकीर्तितमिति॥ एकावरणसं
युक्तमिति॥ आवरणं कुंडावरणरूपत्वात्। मेखला। तेन एकमेखल
मित्यर्थः॥ एकमेखलामानं तु मध्यसूत्रं चतुर्विंशतिधा विभज्य तदंशैः
षड्भिर्द्विरंशैः स्यान्यविस्तारा। तावत्तुंगा चेति। तदुक्तं वाजपेय्यां॥ षडंशा
विस्तृता न्नता थवै किंकैव मेखलेति। एतद्विगुणितं कुंडमिति। एकस्मा
त्पूर्वोक्तादेकहस्तकुंडात् द्विगुणितं द्विहस्तमित्यर्थः॥ दशध्वजा। दशप
ताका॥ षोडशहस्तदंडो मध्यध्वजः॥ स्रुक्स्रुवौ पूर्णाहुत्यर्थमौदुंबरका
ष्ठनिर्मितः प्रनालः॥ कुंभ २० कोडियां ५० सूत्रशेर १ अश्वत्थोदुंबरप्लक्ष
न्यग्रोधानां पत्रवा॥ मुद्रापन २० फोफलशेर १ नालिकेर २५ पंचव

© Dharmartha Trust J&K. Digitized by eGangotri

न्निपंचरत्नानिसर्वतोलदुसंडलार्थं॥ पंचवर्णकोवितानः॥ एकसुवर्णनिर्मिताष्ट
ष्टादशभुजाष्टभुजावादेवीमूर्त्तिः॥ तदुक्तंदेवीचरित्रे॥ मूर्त्तिर्देव्याःप्रकुर्वीतसुवर्णस्य
पलेनहि॥ तदर्द्धेनवाकुर्य्यात्तुतदर्द्धेनमहामते॥ अष्टादशभुजांदेवींकुर्याद्वाष्टकराम
पि॥ इतिहीरनाथांगोक्तौरतदुक्तंदेवीचरित्रे॥ पट्टकूलयुगच्छन्नांवेदिमध्येनिधा
पयेत्॥ पुण्याहवाचनार्थताम्रकलश१ बलिदानार्थमाषमिश्रिततंडुलशेर२॥ तीर्थो
दकं॥ सर्वौषध्यः॥ उपलोट॥ दारुहलदा। कूठ। काहलदा। चंदन॥ वालो॥ वचा॥ कचुरो॥
मुस्ता॥ छड१॥ इतिउपहारः॥ कस्तूरि। कुंकुम। चंदन। कर्पूर॥ सुवर्णरजतान्विता
देव्याअलंकारः॥ श्वेतपुष्पाणि॥ अगरु। गुग्गुल॥ ताम्रमयंदीपभाजनं॥ घृतंमण१॥
नैवेद्यार्थंदधिखण्डान्नशर्करान्वितपायसं॥ दशजापका। आचार्य्य। ब्रह्मा। अष्टौद्वारपालाः॥
एवंविंशति। वरणसामग्री॥ वस्त्रयुग्मानि। हस्तमुद्रा। कर्णमुद्रा। उपवीत। मधुपर्को २
पहाराः॥ पालाशस्यसमिद्धः॥ २०००॥ अर्कःपलाशखदिर। अपामार्गोश्वपिप्पलः। उदुं
बरःशमीदूर्वाकुशाश्चसमिधःक्रमात्॥ इतिनवग्रहार्थंसमिधः॥ द्राक्षा। इक्षु। पूग॥

© Dharmartha Trust J&K. Digitized by eGangotri

नारिंग। जंबीर। बीजपूर। खारेक। नालिकेर॥ दाडिमानि॥ इतिक्रमाद्द्राणां
फलानि॥ दक्षिणाजापकेभ्य एकैकं सुवर्णं॥ द्वे सुवर्णे गुरवे। सोपस्करा शय्या
देवीभक्ताय कस्मैचित्॥ कपिला गौः॥ नीलमणिः श्वेताश्वः॥ छत्र। चामर। दा
सी। दास। अजाः॥ अविः॥ अन्यान्यपि चरथ महिषीगृहभूमिप्रभृतानि॥ कुं
कुमाक्तपुष्पवस्त्रालंकारभूषणादिदानानि॥ तदुक्तं देवीचरित्रे॥ दक्षिणां च द
देत्पश्चाद्धेमवस्त्रादिकं तदा। जापकेभ्यो दिशेत्स्वर्णं गुरवे द्विगुणं दिशेत्॥ श
य्यां सोपस्करां दद्याद्देवीभक्ताय सुव्रत। कपिला गौ नीलमणिः श्वेताश्वं छत्र चा
मरं॥ अन्यान्यपि च दानानि दासीदासमजाविकं॥ कुंकुमाक्तवस्त्राणि पुष्पा
लंकारभूषणमिति॥ ततः पंचामृतः॥ देव्या होमद्रव्याणि। पायससश्चरुः। गडूची॥
दूर्वा। शुक्लास्तिला॥ मण१॥ यवशेर१०॥ नानाविधानि पुष्पाणि॥ कुशा। चंदन। इत्ये
वमादीनुपहारान्संभृत्य शोभने दिवसे विष्ट्यादिदोषवर्जिते कर्तृचंद्रबलोपेते
प्रातरुत्थाय दंतधावनादिकं विधाय॥ नदीं गत्वा। नद्यादौ विधिवत्स्नात्वा नाति

© Dharmartha Trust J&K. Digitized by eGangotri

मात्रें नसिस्थितः। दशांशजप्तिर्निराम्नानं नवबीजेन पावयेत्॥ ऐं ह्रीं क्लीं चामुंडायै
विच्चे। इति नवबीजानि। कृत्वा मायाक्लिकं सर्वमुदकांते समाहितः। तर्पणं चंडिका
याः कृत्वा षडंगं न्यासपूर्वकं। मायाबीजं तारपूर्वं चतुर्थ्यंतां तु चंडिकां। प्रोच्चार्य हृदयाः
दीनि षडंगानि प्रकल्पयेत्। तद्यथा॥ ॐ ह्रीं चंडिकायै हृदयाय नमः। उदकोपस्पर्श
नं। ॐ ह्रीं चं॰ शिरसे स्वाहा। ॐ ह्रीं चं॰डिकायै शिखायै वषट्। ॐ ह्रीं चं॰ कवचाय हुं। ॐ ह्रीं
चं॰ नेत्रत्रयाय वौषट्॥ ॐ ह्रीं चं॰ अस्त्राय फट्॥ एवं न्यासविधिं कृत्वा ध्यात्वा महि
3 षमर्दिनीं। चंडिकां त्रिजगद्धात्रीं ब्रह्माद्यमरवंदितां। ततो नवात्ममंत्रांते चंडिका
तृप्यतामिति। जलांजलीमष्टशतं सुगंधिकुसुमान्वितं। अशक्तश्चेत्तदर्द्धेन
तदर्द्धार्द्धेन वा पुनः॥ तद्यथा॥ तद्यथा। मूलं चंडिका तृप्यतां इति। एवं महा
त्वकृत्वा संतर्प्य ततो यत्र स्थले शिवालये वा देवगृहे वा शतचंडी चिकीर्षिता। तत्स्थले ग २
त्वा मंडपादुत्तरतः प्राक् वा शुचौ देशे गोमयेनोपलिप्ते चतुःकोणे मंडले स्वस्तिको
पेते चंदनादिभिरर्चिते गत्वा तत्र पीठोपरि तद्दर्भुर स्वस्त्य प्रविश्य॥ आसनादृतपा

© Dharmartha Trust J&K. Digitized by eGangotri

अर्घोदकपात्रादिकांचनरूप्यताम्रान्दक्षिणांतआसादयिष्यमाणब्राह्मणानां
स्नात्वागत्यपीठेषुपंक्त्यास्थापितेषुप्राङ्मुखानुपवेश्य॥ अद्यादिदेशकालौसंस्मृ
त्यप्रधानसंकल्पंकुर्यात्॥ तद्यथा॥ आचमनंप्राणायामः॥ स्वस्तिनोमिमीतां॰
संगमेमहि॥ सुमुखश्चेत्यादिश्लोकैर्गणेशनामानिसंकीर्त्य॥ अद्येत्यादिवाक्यांशे
षेषुप्रदेशेषुयथास्थानस्थितेषुसत्स्वित्यंतमुच्चार्य॥ ममसर्वकार्यनिवृत्त्यैध्यर्थंस
र्वशत्रुक्षयायपुत्रलाभायममसर्वरोगनिवृत्त्यैसमस्तोत्पातानांचनाशायश्रीत
चंडिकापाठंशास्त्रोक्तविधिनाचंडीपूजनपूर्वकंब्राह्मणद्वारयाहमाचरिष्ये॥ त
दंगत्वेनऋत्विजांवरणंमधुपर्केणार्चनंचाहंकरिष्ये॥ कुरुष्वेतिब्राह्मणाब्रूयुः॥
तदनंतरंयजमानोब्रूयात्॥ पावनाःसर्ववर्णानांब्राह्मणाब्रह्मरूपिणः। अनुग्र
हंतुमामद्यशतचंड्याख्यकर्मणि। स्वस्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः॥ श्रोत्रि
याःसत्यवाचश्चदेवध्यानरताःसदा। देवानांचपितृणांचसर्वदातृप्तिकारकाः॥ वे
दाध्ययनिनःपापावेदविक्रयवर्जिताः। ब्रह्मयज्ञपरानित्यंधर्मध्यानपरायणाः॥

© Dharmartha Trust J&K. Digitized by eGangotri

-अग्निहोत्ररताः सम्यक् स्मार्त्तकर्मणि तत्पराः ॥ यद्वद्वाक्यामृतसंसिक्ता हृद्यं यां
ति नरद्रुमाः ॥ तेगीन्कुर्वन्तु मत्कर्मकल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्ता
मंत्रार्थस्थिरबुद्धयः ॥ यत्कृपालोकनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः ॥ स्वागतं त्नो
द्विजश्रेष्ठा मदनुग्रहकारकाः ॥ इदमर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतां ॥ ३ प्र
तिगृह्णीमह इति ब्राह्मणा ब्रूयुः ॥ अथ यजमान आसने उपविश्योदङ्मुखस्य ब्र
ह्मणस्य चरणक्षालनं स्वयं प्राङ्मुखः कुर्यात् ॥ ततः स्वयमुदङ्मुखः प्राङ्मुखाना
माचार्यादीनामृत्विजां चरणक्षालनं कुर्यात् ॥ यथा अस्मिन् शतचंडीविधान
कर्मणि ब्रह्मन् एतत्ते पाद्यं ॥ एष ते अर्घः ॥ पूजा स्वस्ति न इंद्रो० धातु ॥ पूजा पाद
प्रक्षालनं आचमनं ॥ एवं सर्वेषां ॥ ऋत्विक्चरणोदकेन आत्मानं परिवारं च ६
संप्रोक्ष्य ॥ स्थलांतरं गत्वोपविश्यात्मनश्चरणौ धौत्वाचम्य ॥ वेदघोषपुरःसरं ऽ
मंडपं प्रदक्षिणीकृत्य ॥ पश्चिमद्वारेण प्रविशेत् ॥ तदनंतरं पश्चिमवेद्यामुत्तर
वेद्यां वा उपविश्य ॥ वरुणश्राद्धं कुर्यात् ॥ आचमनं प्राणायामः ॥ स्वस्ति नो० सं

गमेमहि॥ अपवित्रः पवित्रोवाइत्यादि॥ पास्मै० मधु ३॥ अद्येत्यादिब्राह्मणद्वार
याशतचंडीविधानकर्मणः प्रारंभनिमित्तंवरुणपूर्वकमहंकरिष्ये॥ दक्षिणंजा
न्वालभ्यब्रह्मावाहनं॥ आवाहयामिदेवेशंब्रह्माणंकमलोद्भवं। चतुर्वेदसमायु
क्तंसर्वसिद्धांतवेदिनं। सुगोत्रंप्रवरं विप्रशाखावेदसमन्वितं॥ कर्मज्ञंकर्मसंपत्त्यैब्र
ह्माणंत्वामहंवृणे। ब्रह्मजज्ञानमितिमंत्रंपठेत्॥ वृतोस्मीतिविप्रोब्रूयात्॥ ततः आचा
र्यावाहनं॥ आवाहयामिदेवेशमाचार्यंयज्ञकारिणं। पुराणंन्यायमीमांसावेदशास्त्रार्थ
पारगं। गोत्रप्रवरसंयुक्तंशाखावेदसमन्वितं। कर्मसंपादनायाहमाचार्यंत्वामहंवृ
णे। बृहस्पतेअति० इतिमंत्रः जापकावाहनं॥ यथावेदायथाब्रह्मायथायज्ञास्तथै
वमे। प्रपूज्याजापकायूयंजपयज्ञप्रसिद्धये॥ गौतमात्रिभरद्वाजवसिष्ठाद्याः समन्वि
ताः। गोत्रप्रवरसंयुक्ताः शाखावेदसमन्विताः॥ ततः सप्तशतीपाठाशतमादौश
तंचांतेजपेन्मंत्रंनवाक्षरं॥ मध्येसप्तशतीपाठएवमेवससंपुटं॥ सकामः संपुटं कु
र्यान्निःकामः संपुटंत्यजेत्॥ संपुटेनविनाकामानैवसिद्धिमवाप्नुयुः॥ संपुटेनसम

© Dharmartha Trust J&K. Digitized by eGangotri

न्वित॥ सर्वसिद्धिकरस्तस्माद्युष्मानीह वृणोम्यहं॥ वृतास्मः इति ब्राह्मणा ब्रूयुः॥ द्वार
पालावाहनं। चतुर्द्वारस्थिता यूयं वेदपारायणं प्रति। कर्तुं समर्थास्त्वस्तस्मादेतदर्थम
हं वृणे॥ वृतास्मः॥ मृत्युंजयमंत्रजापकावाहनं। योपमृत्युहरौ रोगघ्नो मृत्युंजयम
नुः स्मृतः॥ जपकर्मविदं शांतं तदर्थं त्वामहं वृणे॥ अथ जातवेदाजापकावाहनं॥ अ
रातिचयविध्वंसो नानादुरितसंक्षयः॥ दुर्गाप्रसादाद्भवति जपार्थं त्वां वृणोम्यहं इति॥
ततः ब्रह्मणे आचार्याय ऋत्विक्भ्यश्च इदमासनं। ततः यथादत्तं चंदनं० ब्रह्मणे आचा०
5 अहं संप्रददे। इमानि अर्चि० स्व॥ आचमनं। यथा दास्यमानं भोजनं ब्रह्मणे० अहं सं
प्रददे। इमानि राजनाधारच्छत्रोपानत्कमंडलुवसनासनकर्णमुद्राहस्तमुद्रोपवीता
दीनि वस्तूनि तन्निःक्रयीभूतं यथोपपन्नं किंचित् द्रव्यं वा ब्रह्मणे आचार्याय० अहं संप्र
ददे। पुण्याहं दीर्घमायुरस्त्वित्यादीनि वरुणश्राद्धकर्मणः प्रति० हिरण्यदक्षिणां० ब्रह्म ५
णे० ददे॥ अस्य वरुणश्राद्धकर्मणो० गृहे वृद्धि० स्व॥ आशिर्वादाः॥ अथ ब्राह्मणप्रार्थना॥
ब्राह्मणाः संतु मे शांताः पापान्मां त्रसमाहिताः॥ देवानामपि दातारः पातारः सर्वदेहिनां॥

© Dharmartha Trust J&K. Digitized by eGangotri

येषां देहे स्थिता वेदा पावयंति जगत्त्रयं । रक्तं त्वसततं ते मां जपयज्ञव्यवस्थिताः ।शतचंडी
जपार्थं मे संतु ते नियमान्विताः । अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ।चंडीध्यान
परा नित्यं प्रसन्नमनसः सदा । मात्सर्येण न ताषिणः संतु मा संतु परनिंदकाः । ममापि निय
मा विप्रा नवंतु नवतामपि ॥ अथ ब्राह्मणा ऊचुः ॥ वयं नियमसंयुक्ता तव कर्त्तव्यतत्पराः ॥
कार्यं तव करिष्यामो विधिपूर्वं न संशयः ॥ कर्त्तव्या नास्तिक्याशंका वेदाज्ञा हि गरीयसि ।
वैदिका न हि वेदाज्ञां लंघयंति कदाचन । त्वदधीनं त्वया कार्यं निःशंकं श्रद्धयान्वितं ॥
वयमेतत्करिष्यामस्तव कार्यं न संशयः ॥ अथ यजमानो ब्रूयात् ॥ धन्योहं कृतकृ
त्योहं सौभाग्योहं धरातले । प्रसादाद्भवतां विप्राः पवित्रोहं कृतो धना । मेरुमंदरवत्यो
हं नवद्भिर्भूतले कृतः । यशो विस्तारितं मेद्य यत्नादृष्ठिश्च मे कृता । अद्य मे पितरस्तृप्ताः
पवित्रं मे कुलं कृतं । देवतानां प्रसादोपि जातो मेद्यैव निर्मलः । कार्यं कर्तुं न मे शक्ति
र्नैव दातुं च दक्षिणाः । न च पूजां विधातुं च नमस्कारं करोम्यहं । शक्त्या सर्वं करिष्या
मि वचनाद्भवतां च तत् । दयाशीर्वाद सिंधूनां पूर्णं सर्वं भविष्यति ॥ ॥इति वरुण

© Dharmartha Trust J&K. Digitized by eGangotri

श्राद्धं समाप्तः॥ ॥ततः स्वस्तिवाचनं कुर्यात्॥ ॥ततः गुरुर्वेद्यपरि आसने उपवि-
श्य॥ आचम्य प्राणानायम्य॥ पूजासंकल्पं कृत्वा भूतशुद्धिं कुर्यात्॥ तत्र॥ मूलाधारे
तडित्कोटिसमप्रभां बिसतन्तुतनीयसीं सार्द्धत्रिवलयाकारां वर्णमयीं कुंडलिनीं भु-
जंगीरूपमां संचिंत्य प्रणवेन अंकुशमुद्रया उत्थाप्य सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा॥ ब्र-
ह्मरंध्रस्थ शिवस्वरूपं जीवे नियोजयेत्॥ तत्र स्मरणं हकारं लकारमध्ये प्रविलाप्य॥ ल-
कारं हकारे ककारं सकारे सकारं षकारे इत्यादि विलोममातृकया प्रविलाप्य॥ पंचत-
6 त्त्वानि ध्यायेत्॥ पादादिजान्वपर्यन्तं पृथिवीस्थानं तत्र पार्थिवमंडलं चतुरस्रं अष्टदि-
ग्वज्रलांछितं तन्मध्ये लंबीजं पीतवर्णं तेन पंचगुणां पृथिवीं षड्गुणोद्भूतां तद्योगेन
शोषयामि॥ लं हुं फट्॥ जान्वादिनाभिपर्यन्तं अपां स्थानं तत्र वारुणमंडलं धनुराकारं
उभयोः कृष्णः श्वेतपद्मलांछितं तन्मध्ये वं बीजं शुक्लवर्णं तेन चतुर्गुणा आपः पंचोद्भू- ६
तद्योगेन शोषयामि॥ वं हुं फट्॥ नाभ्यादिहृदयपर्यन्तं अग्निस्थानं॥ तत्र त्रिको-
णं वह्निमंडलं कोणत्रये स्वस्तिकैर्लांछितं तन्मध्ये रंबीजं रक्तवर्णं तेन त्रिगुणं वह्निं चतु-

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्धात्तप्रयोगेण शोषयामि ॥ वं रं हं फट् ॥ हृदयादिभ्रूमध्यपर्यंतं वायुस्थानं तत्र
वर्तुलं वायुमंडलं षट्बिंदुभिर्लांछितं तन्मध्ये यं बीजं धूम्रवर्णं तेन द्विगुणं वायुं
त्रिरुद्धात्तप्रयोगेण शोषयामि ॥ वं यं हं फट् ॥ भ्रूमध्यात् ब्रह्मरंध्रपर्यंतं आकाशव
र्तुलं नभोमंडलं श्वेतध्वजलांछितं तन्मध्ये हं बीजं नीलवर्णं तेनैकगुणं नभः द्विरुद्धा
त्तप्रयोगेण शोषयामि ॥ वं हं हं फट् ॥ ध्यानं ॥ पापपुरुषस्य । ब्रह्महत्या शिरस्कंच
सुवर्णस्तेयभुजद्वयं । सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं । तत्संयोगिपदद्वंद्व
मंगप्रत्यंगपातकं । उपपातकरोमाणि रक्तश्मश्रुविलोचनं । खड्गचर्मधरं कृष्णं कु
क्षौ पापं विचिंतयेत् ॥ अंगुष्ठमात्रपुरुषं वामकुक्षौ विचिंतयेत् ॥ ततः पापपुरुषदह
नं कुर्यात् । यमिति वायुबीजस्य किष्किंधऋषिः जगती छंदः । महावायुस्वरूपी देव
ता यं बीजं बिंदुशक्तिः । तेन महाप्रबलया वायुना मम मनोवाक्कायकृतपापपुरुषं शोष
यामि ॥ वायुधारणं ॥ पूरक १८ कुंभक ३६ । रेचक ९ एवं सर्ववारमित्यस्याग्निबीजस्य कश्य
पऋषिः जातवेदाग्निर्देवता त्रिष्टुप्छंदः । रं बीजं बिंदुशक्तिः । तेन नमिह महाप्रबलयाग्निना मं

© Dharmartha Trust J&K. Digitized by eGangotri

पापपुरुषं संदहेत्॥ वमित्यमृतबीजस्य हिरण्यगर्भऋषिः गायत्री छंदः परमात्मा
देवता। वं बीजं बिंदुः शक्तिः॥ अस्मन्मनोवाक्कायकृतपापपुरुषाधिष्ठितं दग्धशरीर
मस्मप्लावने विनियोगः॥ ब्रह्मरंध्रस्थितं चंद्रमंडलसहस्रदलकमलकर्णिकाम
ध्यवर्त्तितद्बीजस्रवदमृतधारासहस्रैः कलेवरमापूरितं ध्यायेत्॥ लमिति पृथ्वीबी
जस्य वाराहऋषिः गायत्री छंदः पृथ्वी देवता लं बीजं बिंदुः शक्तिः॥ तेन बीजेन तद्भस्म
पुंजं कठिनमंडं हिरण्मयं कृत्वा। हमित्याकाशबीजस्य परमेष्ठी प्रजापतिर्ऋषिः
7 गायत्री छंदः आकाशो देवता हं बीजं बिंदुः शक्तिः। तेन बीजेन द्वारविवरं कृत्वांडं प्र
विश्य। ततः द्वादशांते स्थितजीवात्मानं सोहं मंत्रेण स्वहृदयारविंदे समानीय प्रा
णप्रतिष्ठां कुर्यात्॥ अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः शिरसि। ऋग्य
जुः सामानि छंदांसि मुखे। प्राणशक्तिर्देवता हृदि। आं बीजं नाभौ। ह्रीं शक्तिः गुह्ये। क्रों ७
कीलकं पादयोः॥ इति ऋष्यादि॥ ॐ कंध आं अंगुष्ठाभ्यां नमः। इं चंध ईं क्रों तर्जनी
भ्यां नमः। उं टं४ ऊं क्रों मध्यमा० एं तंध ऐं आं अनामि० ओं पंध औं ह्रीं कनिष्ठि० अं यं ए अः

© Dharmartha Trust J&K. Digitized by eGangotri

क्रों करतलपृ०॥ इति करन्यासः॥ अं कं५ ङं आं आकाशवायुतेजोपृथिव्यात्मने
हृद०॥ इं चं५ ञं ईं शब्दस्पर्शरूपरसगंधात्मने शिर० उं टं५ णं ऊं श्रोत्रत्वक्चक्षुजिह्वा
घ्राणात्मने शिखायै० एं तं५ नं ऐं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं॥
ओं पं५ मं औं वचनादानगतिविसर्गानंदात्मने नेत्रत्र० अं यं१० क्षं अः मनोबुध्यहं
कारचित्तात्मने अस्त्राय०॥ इति षडंगः॥ १ आं नमः नाभ्यादिपादपर्यंतं न्य
सेत्॥ ह्रीं नमः हृदयादिनाभिपर्यंतं। क्रों नमः मस्तकादिहृदयपर्यंतं॥ यं न
मः ब्रह्मरंध्रे। रं नमः सीमंते। लं नमः ललाटे। वं नमः भ्रूमध्ये। शं नमः कंठकूपे॥
षं नमः हृदये। सं नमः नाभौ। हं नमः लिंगे। क्षं नमः मूलाधारे॥ इति विन्यस्य प्रा
णशक्तिं ध्यायेत्॥ २ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं
कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान्। बिभ्राणासृक्कपालं त्रिनयन
विलसत्पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा
नः॥ इति ध्यात्वा हृदि करतलं निधाय॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सोहं म

© Dharmartha Trust J&K. Digitized by eGangotri

म प्राणाः इह प्राणाः आं ह्रीं क्रों यं र सोऽहं मम जीव इह स्थितः। आं ह्रीं क्रों यं र सोऽहं मम
सर्वेन्द्रियाणि। आं ह्रीं क्रों यं र सोऽहं मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवा
गत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति त्रिः पठेदिति प्राणप्रतिष्ठा॥ छ॥ ॥अथ मातृका
न्यासः॥ अस्य श्रीमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः शिरसि। गायत्री छन्दो मुखे॥
मातृकासरस्वती देवता हृदि। हलः बीजानि नाभौ। स्वराः शक्तयः गुह्ये। व्यक्तयः कील
कं पादयोः॥ नवार्णत्वेन न्यासे विनियोगः॥ अं कं ५ आं अङ्गुष्ठाभ्यां नमः॥ इं चं ५ ईं तर्ज
8 नी०। उं टं ५ ऊं मध्यमा०। एं तं ५ ऐं अनामि०। ओं पं ५ औं कनिष्ठि०। अं यं ८ अः करतल
पृष्ठा०॥ इति करन्यासः॥ एवमेव षडङ्गः॥ ततः स्वरैः पूरकं कादिपञ्चवर्गैः कुंभकं यादि
भिः रेचकमिति त्रिः प्राणानायम्य॥ अन्तर्मातृकां ध्यायेत्॥ आधारे लिङ्गनाभौ हृदय
सरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदलेऽवादशार्द्धे चतुष्के। वासान्ते बा ८
लमध्ये डफकठसहिते कण्ठमध्ये स्वराणां हं क्षं तत्त्वार्थयुक्तं सकलदलयुतं वर्णरूपं
नमामि॥ इति ध्यात्वा कण्ठदेशे विशुद्धे षोडशदलेषु प्रादक्षिण्येन॥ ॐ अं नमः। एवं षो

© Dharmartha Trust J&K. Digitized by eGangotri

डशस्वरान्विन्यस्य॥ हृदये अनाहते द्वादशदलेषु प्रादक्षिण्येन॥ ॐ कं नमः एवं द्वाद-
शदलान्विन्यस्य। नाभौ मणिपूरे दशदलेषु प्रादक्षिण्येन। ॐ डं नमः एवं दशवर्णान्
विन्यस्य। लिंगे स्वाधिष्ठाने षड्दलेषु प्रादक्षिण्येन। ॐ बं नमः एवं षड्वर्णान्विन्य-
स्य॥ शिवेन्यां मूलाधारे चतुर्दलेषु प्रादक्षिण्येन। ॐ वं नमः एवं चतुर्वर्णान्विन्यस्य॥
भ्रूमध्ये आज्ञायां द्विदलयोः। ॐ हं नमः दक्षे। ॐ क्षं नमः वामे। ततः ब्रह्मरंध्रे। स-
हस्रारे। सहस्रदलकर्णिकायां त्रिकोणं विभाव्य। तिसृषु रेखासु प्रादक्षिण्येन। अं
१५ कं १५ थं १५ हं क्षं मध्ये॥ इति विन्यसेदित्यंतर्मातृकान्यासः॥ ततः बहिर्मातृकां ध्यायेत्॥
पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशि-
कलामिंदुकुंदावदातां। अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छा-
कल्पामतुच्छस्तनजघनभरां भारतीं त्वां नमामि॥ इति ध्यात्वा॥ अं नमः मूर्ध्नि। आं ० ललाटे॥
इं ईं नेत्रयोः। उं ऊं कपोलयोः। ऋं ॠं श्रोत्रयोः। लृं लॄं नासापुटयोः। एं ऐं ओष्ठयोः। ओं औं दशनपं-
क्त्योः। अं जिह्वायां। अः तालुस्थाने। कवर्गं दक्षिणहस्तस्य संधौ। तदग्रेषु न्यसेत्। चवर्गं वाम

© Dharmartha Trust J&K. Digitized by eGangotri

हस्तसंधौ तदग्रेषु। टवर्गं दक्षिणपादसंध्यग्रेषु। तवर्गं वामपादसंध्यग्रेषु। पवर्गं हृदि
विन्यसेत्॥ यं नमः त्वचि। रं नमः रक्ते। लं नमः मांसे। वं नमः मेदे। शं नमः अस्थि। षं नमः
मज्जायां। सं नमः रसे। हं क्षं नमः शुक्रे॥ इति अथ द्वितीयमातृकान्यासः॥ ॐ ऐं क्लीं
नमः कनिष्ठिकाभ्यां नमः॥ ॐ प अनामिकाभ्यां नमः॥ ॐ प मध्यमाभ्यां॰। ॐ तर्जनी॰॥
ॐ प अंगुष्ठाभ्यां॰। ॐ प करतलाभ्यां॰। ॐ प करपृष्ठाभ्यां॰। ॐ प दक्षिणकूर्परे। ॐ प वाम
कूर्परे। ॐ प दक्षमणिबंधे। ॐ प हृदयाय नमः॥ उदकोपस्पर्शनं। ॐ प शिरसे स्वाहा। ॐ प
शिखायै वषट्। ॐ प कवचाय हुं। ॐ प नेत्रत्रयाय वौषट्। ॐ प अस्त्राय फट्॥ इति दि
9 क्षु दिग्बंधार्थं अस्त्रकरतालिकया क्षिपेत्॥ इति॥ तृतीयो मातृकान्यासः॥ क्लीं ब्रह्मा
णी पूर्वतः पातु इति पूर्वस्यां पुष्पाणि क्षिपेत्। क्लीं माहेश्वरी आग्नेय्यां पातु। क्लीं कौमारी दक्षि
णे पातु। क्लीं वैष्णवी नैर्ऋत्यां पातु। क्लीं वाराही पश्चिमे पातु। क्लीं नारसिंही वायव्यां पातु। क्लीं
ऐंद्री उत्तरे पातु। क्लीं चामुंडा ईशान्यां पातु। क्लीं व्योमेश्वरी ऊर्ध्वं पातु। क्लीं सप्तद्वीपेश्वरी भुवि
पातु। क्लीं नागेश्वरी पाताले पातु॥ इति अथ चतुर्थः षट्देवीन्यासः॥ कमलांकुशहस्ता

© Dharmartha Trust J&K. Digitized by eGangotri

नंदा पूर्वांगे पातु । खड्गपात्रकरा रक्तदंतिका दक्षिणांगे पातु । पुष्पपल्लवमूलादि ह
स्ता शाकंभरी पश्चिमांगे पातु ॥ धनुर्बाणधरा दुर्गा वामांगे पातु । शिरःपात्रकरा भी
मा मस्तकाच्चरणपर्यंतं पातु ॥ चित्रकांतिश्चित्रभ्रमरपाणिः भ्रामरी चरणान्मस्तकां
तं पातु ॥ इति चतुर्थः ॥ क्लीं पादाभ्यां नाभिपर्यंतं ब्रह्मा पातु । नाभ्यादि कंठपर्यंतं जना
र्दनः पातु । कंठाच्छिरःपर्यंतं रुद्रः पातु ॥ हंसः पदद्वये पातु । वैनतेयः करद्वयं पातु ॥ च
क्षुषी वृषभः पातु ॥ सर्वांगानि गजाननः पातु । अंगपरं परा हरिः पातु ॥ इति ॥ अथ ष
ष्ठो महालक्ष्म्यादिन्यासः ॥ अष्टादशभुजा महालक्ष्मी मध्यं पातु । अष्टभुजा सरस्वती ऊ
र्ध्वं पातु । इति ऊर्ध्वांगि ॥ त्रिंशल्लोचनमंडिता महाकाली अधः पातु । सिंहो हस्तद्वयं पातु ।
परमहंसः अक्ष्णोः पातु । महिषेणसमायुक्तः प्रेतः पादद्वयं पातु ॥ सर्वांगानि महेशानि
पातु । चंडिका परापरं अंगं पातु ॥ इति षष्ठः ॥ अथ सप्तमः ॥ ॐ ब्रह्मरंध्रे । ऐं दक्षिणनेत्रे ।
ह्रीं वामनेत्रे । क्लीं दक्षिणकर्णे । चा वामकर्णे । मुं दक्षिणनासापुटे । डां वामनासापुटे । यै
मुखे । विं लिंगे । च्चे गुदे ॥ इति ॥ अथ अष्टमः ॥ ॐ गुदे । ऐं लिंगे । ह्रीं मुखे । क्लीं वामनासापु

© Dharmartha Trust J&K. Digitized by eGangotri

दे। चा दक्षिणनासापुटे॥ मुं वामकर्णे। डां दक्षिणकर्णे। यै वामनेत्रे। वि दक्षिणनेत्रे। च्चे ब्र
ह्मरंध्रे॥ अथ नवमः॥ नवाक्षरमंत्रं मस्तकाच्चरणावधि पूर्वांगे न्यसेत्॥ ततस्तं मंत्रं
दक्षपार्श्वे। ततस्तं मंत्रं पृष्ठे। ततस्तं मंत्रं वामपार्श्वे। तमेव मंत्रं वामपार्श्वे। तमेव पृष्ठे।
तमेव दक्षपार्श्वे। तमेव चरणान्मस्तकावधि॥ इति॥ अथ दशमः॥ मूलं हृदयाय नमः॥
त्रं उदको। मूलं शिरसे स्वाहा। मूलं शिखायै वषट्। मूलं कवचाय हुं। मूलं नेत्रत्रया
य वौषट्। मूलं अस्त्राय फट्॥ इति दशमः॥ अथ एकादशमः॥ खड्गिनी शूलिनी घो
10 रेति श्लोकेन शीर्षतः पूर्वांगे। अनेनन्स्तनतरं॥ शूलेन पाहि नो देवीत्यनेन श्लोकच
तुष्टयेन दक्षिणांगे इति बालार्कसदृशां सर्वस्वरूपे सर्वेश इति पंचश्लोकैः वामांगे॥
इति शुद्धस्फटिकसंकाशं॥ इति एकादशो न्यासः॥ अनेन प्रकारेणैकादशन्यासा
न्विधाय। गुरुर्वेद्युपरि। ईशानकोणे कलशं संस्थाप्य। तत्र देवीमावाह्य पंचोपचा १०
रैर्नवाक्षरेण मंत्रेण संपूज्य। मध्यवेद्युपरि विरचिते सर्वतोभद्रमंडले मध्ये स्थापि
तां स्वर्णनिर्मितामष्टादशभुजां देवीं अनुस्वारपूर्वकं प्रतिष्ठाप्य॥ आवाहनादि

© Dharmartha Trust J&K. Digitized by eGangotri

षोडशभिर्मंत्रैरुपचारैर्नवाक्षरेण मंत्रेण संपूज्य। जापका अप्यस्मिन्समये मा
तृकादिन्यासपूर्वकं यजमानगतं फलं संकल्प्य चंडीपाठमारभेत्। सप्तशतीजापका
अपि एतान्न्यासान्कुर्युः॥ तदुक्तं सप्तशतीकल्पे। एते न्यासाः प्रकर्तव्याश्चंडीसप्तशतीं
जपेत्॥ एवं न्यासविधिं कृत्वा सृष्टिमुद्रां विलोकयेत्। तस्यावलोकनेराजन्कृतो
न्यासः स्थिरो भवेदिति॥ इत्थमेकादशन्यासान्कृत्वा नवाक्षरमंत्रस्य षडंगानि न्यसे
त्॥ अस्य नवार्णवमंत्रस्य हिरण्यगर्भविष्णुरुद्रा ऋषयः महाकालीमहालक्ष्मीम
हासरस्वत्यो देवताः। गायत्र्युष्णिगनुष्टुप्छंदांसि। नंदाशाकंभरीभीमाशक्तयः प
परमशिवलिंगरक्तदंतिकादुर्गाभ्रामरीबीजानि। अग्निवायुसूर्यास्तत्त्वानीति संस्मृत्य।
नवाक्षरमंत्रस्य षडंगानि न्यसेत्॥ मूलं अंगुष्ठाभ्यां नमः। मूलं तर्जनीभ्यां नमः। मूलं
मध्यमाभ्यां नमः। मूलं अनामिकाभ्यां नमः। मूलं कनिष्ठिकाभ्यां०। मूलं करतलपृ
ष्ठाभ्यां नमः। मूलं हृदयाय नमः। इदकोप०। मूलं शिरसे स्वाहा। मूलं शिखायै वषट्। मू
लं कवचाय हुं। मूलं नेत्रत्रयाय वौषट्। मूलं अस्त्राय फट्। ततः षट्कोणमध्यस्थां म

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यबीजे व्यवस्थितां। महाकाल्यास्तु सव्यायां तत्तां दक्षिणेऽन्तरे। संयुक्तां दक्षिणे वामे
सिंहेन महिषेण च। अष्टादशभुजां ध्यात्वा महालक्ष्मीं प्रणम्य च। पीठादिपूजनं कु
र्यात् स्वबीजेन पृथक् पृथक्॥ ऐंकारं बिन्दुमध्यस्थं नामधेयाद्यमक्षरं। देवतानां
स्वबीजं तत्पूजायै ऋद्धिसिद्धिदं॥ तेन स्वस्वबीजेन पीठदेवता आवरदेवताश्च पू
जयेदिति सिद्धं। पूर्वोक्तप्रकारेण देवीं ध्यात्वा ताम्रभाजने षट्कोणं चक्रं गंधादिना
आलिख्य तदुपरि वृत्तमालिख्य तदुपर्यष्टौ दलानि आलिख्य मध्ये त्रिकोणमा
लिख्य तत्र क्रमेण ऐं ह्रीं क्लीं बीजानि आलिख्य। षट्कोणेषु षट् बीजानि आलिख्य॥
आद्ये बीजे महाकालीं। मध्यबीजे महालक्ष्मीं। तृतीयबीजे सरस्वतीं। स्थितां ध्या
त्वा पूजामारभेत्। ततोऽर्घ्यपात्रं शुद्धवारिणा आपूर्य गंधपुष्पाक्षतांस्तत्र विन्यस्य
सर्वाणि तीर्थानि तत्रावाह्य मत्स्यमुद्रया आच्छाद्य मूलेनाभिमंत्र्यास्त्रेणतु हृदि ११
च संरक्ष्य अवगुंठनमुद्रयावगुंठ्य तज्जलेन पूजोपहारान् आत्मानं संप्रोक्ष्य देह
मध्यपीठस्थितां देवीं मानसैरुपचारैः संपूज्य। बाह्यपूजार्थं पूर्वं तत्र षट्कोणपीठपूजां

© Dharmartha Trust J&K. Digitized by eGangotri

कुर्यात्॥ तत्र ओंकारपीठाय नमः॥ पूर्णगिरिपीठाय नमः॥ कामपीठाय नम इति पीठत्र
यं पूजयेत्॥ संप्रदायात्॥ ततः पीठस्य पूर्वादिदिक्षु गणेशाय नमः॥ क्षेत्रपालाय
नमः॥ पादुकाभ्यां नमः॥ बटुकेभ्यो नमः इति चतुर्दिक्षु॥ आग्नेय्यादिचतुर्दिक्षु पूजा प्राद
क्षिण्येन जयायै नमः॥ विजयायै नमः॥ जयंत्यै॰॥ अपराजितायै नम इति सर्वत्र संपूज्य॥
ततः पूर्वस्यां ईशानकोणत आग्नेयकोणपर्यंतं प्रादक्षिण्येन॥ विष्णुमायायै नमः॥ चेतना
यै॰ बुध्यै॰ निद्रायै॰ क्षुधायै॰ पंचशक्तीः पूजयेत्॥ ततो दक्षिणत आग्नेयकोणान्निर्ऋति
कोणपर्यंतं॥ छायायै नमः॥ शक्त्यै॰ तृष्णायै॰ क्षांत्यै॰ जात्यै॰ लज्जायै॰ षट् शक्तीः पूजयेत्॥
ततो नैर्ऋतिकोणाद्वारस्य वायुकोणपर्यंतं॥ शांत्यै नमः॥ श्रद्धायै॰ कीर्त्यैन॰ लक्ष्म्यै॰ धृत्यै॰
वृत्त्यै॰ षट् शक्तीः पूजयेत्॥ ततो वायुकोणं आरभ्य ईशानकोणपर्यंतं स्मृत्यै॰ दयायै॰ तु
ष्ट्यै॰ पुष्ट्यै॰ मात्रे॰ भ्रांत्यै॰ षट् शक्तीः पूजयेत्॥ एवं पीठं संपूज्य तदुपरि पद्मनालस्य मूले आ
धारशक्त्यै॰ कूर्मशक्त्यै॰ शेषशक्त्यै॰ पृथिवीशक्त्यै॰ इति पूजयेत्॥ पद्माय नम इति पद्मं
च पूजयेत्॥ ततः तत्र पद्मे वह्न्यर्कसोमानां मंडलत्रयं पूजयेत्॥ ततः पूर्वपत्रादितः

© Dharmartha Trust J&K. Digitized by eGangotri

ईशपत्रांतं अष्टसु पत्रेषु। ब्रह्माण्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० नारसिं
ह्यै० ऐंद्री० चामुंडायै० अष्टौ शक्तीरर्चयेत्। कर्णिकायां ब्रह्माणीं अर्चयेत्। ततः षट्
सु कोणेषु पूर्वकोणतः प्रादक्षिण्येन। नंदजायै० रक्तदंतिकायै० शाकंभर्यै० दुर्गा
यै० भीमायै० भ्रामर्यै० नमः इति सर्वत्र पूजयेत्॥ मध्ये पूज्य देवी दक्षिणभागे सिंहं
वामभागे महिषं पूजयेत्॥ पीठादिपूजनं कुर्यात् स्वबीजेन पृथक्पृथक् इति व
चनात्। महालक्ष्मीनामधेयाद्याक्षरेण। ह्रुं मं इत्येवंरूपेण महालक्ष्म्याः पीठं पू
जयेत्। ततः सुनिवर्णनिर्मितमहालक्ष्मीप्रतिमायाः अग्न्युत्तारणं विधाय। तस्याः
हृदयादिन्यासं विधाय प्राणप्रतिष्ठां च कृत्वा आवाहनादिपूजां कुर्यात्॥ तत्रप्र
थमं दुर्गायाः स्वर्णमूर्त्तिस्थितायाः ध्यानं। महिषघ्नीं महादेवीं कुमारीं सिंहवाहि १२
नीं। दानवांस्तर्जयंतीं च सर्वकामदुघां शिवां। ध्यायामि मनसा दुर्गां नाभिमध्ये
व्यवस्थितां। आवाहयेत्ततो दुर्गां संसारभयतारिणीं॥ इति ध्यानं विधाय। आक
एयौल्याणजननीं सत्यां कामदां करुणाकरां। अनंतशक्तिसंपन्नां दुर्गामावा

© Dharmartha Trust J&K. Digitized by eGangotri

हृयाम्यहं ॥ महालक्ष्म्यै आवाहनं समर्पयामि ॥ दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे ॥
आसनं मणिमुक्ताढ्यं गृहाण त्वं सुरेश्वरि ॥ इत्यासनं । कात्यायनी महादुर्गे चामुंडे शंक
रप्रिये । पाद्यं गृहाण देवेशि भद्रकालि नमोस्तु ते इति पाद्यं । जगत्पूज्ये त्रिलोकेशी सर्वदान
वभंजनि । अष्टांगार्घ्यं गृहाण त्वं देवि विश्वार्त्तिहारिणी ॥ अर्घः । सर्वलोकस्य याश
क्ति ब्रह्मविष्ण्वादिनिस्कृता ॥ दद्याम्याचमनं तस्यै महालक्ष्म्यै मनोहरं । आच
मनं । ज्ञानमूर्त्ते भद्रकालि दिव्यमूर्त्ते सुरेश्वरि । स्नानं गृहाण देवेशि नारायणि
नमोस्तु ते ॥ इत्यनेन मंत्रेण पंचामृतैर्जलैः स्नपयेत् । स्नानांते आचमनं ॥ पट्ट
सूत्रविचित्राढ्यं नानावर्णैः सुराजितं । वस्त्रं गृहाण देवेशि सुप्रीता वरदा भव ।
इति वस्त्रं । वस्त्रांते आचमनं ॥ सुरासुरशिरोरत्ननीराजितपदद्वये । अलं
कारान् गृहाण त्वं नानारत्नसमन्विता ॥ इत्याभरणानि । श्रीखंडागरुक
र्पूरैर्युक्तं श्रीचंदनं सन्नवं । गृहाण हे गंधं देवेशि भद्रकालि नमोस्तु ते । इति गंधं ।
कुसुमेन समायुक्तैश्चंदनेन विलेपितैः । बिल्वपत्रत्तनावासे दुर्गे देवि शरणं
गतः । इत्यक्षतान् । नानापुष्पविचित्राढ्यां पुष्पमालां सुशोभनां । प्रयच्छा

© Dharmartha Trust J&K. Digitized by eGangotri

मि सुरेशानि सुप्रीता वरदा भव ॥ इति पुष्पं ॥ गुग्गुलं घृतसंयुक्तं नानागंधसुसंयुतं ॥
धूपं गृहाण चामुंडे मे भद्रकालि नमोस्तु ते ॥ इति धूपं ॥ पट्टसूत्रोज्वलं सद्वर्त्ति गोघृते
न समन्वितान्। दीपान् गृहाण देवेशि नारायणि नमोस्तु ते ॥ इति दीपं। दिव्यान्नं गो
घृतोपेतं नानान्नैः समन्वितं। मया निवेदितं तुभ्यं नारायणि नमोस्तु ते ॥ इति नै
वेद्यं। नैवेद्यांते आचमनं ॥ गृहाण देवि तांबूलं कर्पूरेण सुसंयुतं। मया निवेदितं तु
भ्यं नारायणि नमोस्तु ते ॥ इति तांबूलं ॥ नालिकेरं गृहीत्वा। जयंती मंगला काली भ
द्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते। इत्यर्घ्यं। दुर्गा
13 कात्यायनी चंडी महिषासुरमर्द्दिनी। दीपमालां प्रयच्छामि सुप्रीता वरदा भव ॥
॥ इति नीराजनं ॥ प्रथमे दिवसे दशदीपाः ॥ द्वितीये दिवसे २० तृतीये ३० चतुर्थे ४० एवं श
तदीपाः ॥ चतुर्थदिनपर्यंतं दिनवृध्या दीपवृद्धिः ॥ दुर्गे देवि नमस्तुभ्यं नमस्ते लोकपूजि
ते। पुष्पांजलिं मया दत्तं सुगृहाण सुरेश्वरि ॥ इति पुष्पांजलिं ॥ सर्वस्वरूपे सर्वेशे सर्वशक्ति १३
समन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ सर्वमंगलमांग० नमोस्तु ते ॥ इति
वान्यां नमस्कारः ॥ अंजलिं बध्वा। महिषघ्नी महामाये चामुंडे मुंडमालिनि ॥ यशो देहि ध

© Dharmartha Trust J&K. Digitized by eGangotri

तं देहि सर्वान् कामांश्च देहि मे ॥ इति प्रार्थयेत् ॥ ततः मया जन्मसहस्रेषु अर्चितं पाप
संशयं। तत्सर्वं नाशयेत् क्षिप्रं प्रदक्षिणं पदे पदे ॥ इति प्रदक्षिणा ॥ ततः पूजासमृध्य
र्थं दक्षिणा संकल्पः ॥ पूजायाः सद्गुणार्थं तु दक्षिणा दीयते मया। तां गृहाण महेशानि
पूजां मे सफलं कुरु ॥ इति षोडशोपचारः ॥ ततः चतुरस्रे पूर्वाद्यष्टदिक्षु क्रमेण पूजये
१५ त्। पूर्वे। उड्याणपीठाय नमः ॥ उड्याणेश्वराय नमः ॥ उड्याणांबापादुकाभ्यां० नमः। आग्ने
ये मातृकापीठा० मातृकेश्व० मातृकांबापा० ततः दक्षिणे जालंधरपीठा० जालंधरेश्वरा० ॥ २
जालंधरांबापा० ॥ ततः नैर्ऋत्यां कोल्लापुरपीठाय० ॥ कोल्लारे० ॥ कोल्लरांबा० ततः प
श्चिमे। पूर्णगिरिपीठाय० पूर्णेश्वराय० पूर्णांबा० ततः वायव्यां चौहारपीठा० चौहारेश्वराय०
चौहारांबा० ततः उत्तरे। लंकागिरिपीठाय० लंकेश्वराय० लंकांबापा० ईशाने कामरू
पीठाय० कामेश्वराय० कामांबा० तत्रैवाष्टदिक्षु पूर्वादिक्रमेण अष्टसिद्धान् पूजयेत्।
गोरक्षनाथाय नमः ॥ अलक्षनाथाय० आदिना० अनघना० बालना० सत्यना० प्रे
मनाथाय० ततः चतुरस्रे चतुःकोणेषु वेतालचतुष्टयं पूजयेत्। आग्नेये अग्निमु
खाय० नैर्ऋत्यां करालवदनाय० वायव्यां ज्वालामुखाय० ईशान्यां धूम्रवेतालाय०

© Dharmartha Trust J&K. Digitized by eGangotri

ततश्चाष्टदले पूर्वादिक्रमेण ब्राह्म्याष्टकं पूजयेत्॥ क्रों ब्रह्माण्यै नमः। क्रों माहेश्वर्यै॰॥
कौमार्यै॰। वैष्णव्यै॰। वाराह्यै॰। नारसिंह्यै॰। माहेन्द्र्यै॰। चंडिकायै॰। तत्रैव भैरवाष्टकं॥
असितांगभैरवाय नमः। रुरुभैरवाय॰। चंडभैरवाय॰। क्रोधभैरवाय॰। उन्मत्तभै
रवाय॰। कपालभैरवाय॰। भीषणभैरवाय॰। संहारभैरवाय॰॥ तत्रैव अष्टदिक्
पालान् पूजयेत्॥ इंद्राय नमः। अग्नये॰। यमाय॰। नैर्ऋतये॰। वरुणाय॰। वायवे॰।
सोमाय॰। ततः षट्कोणे षट्दलेषु पूर्वादिक्रमेण॥ गुरवे नमः। परमगुरु॰। परमेष्ठि
गु॰। विनायकाय॰। हरये॰। हराय॰। ततस्त्रिकोणे महाकाल्याः पृष्ठतः॥ रुद्राय न
मः। गौर्यै॰। महालक्ष्म्याः पृष्ठतः। विष्णवे नमः। लक्ष्म्यै॰। महासरस्वत्याः पृष्ठतः। ब्रह्म
णे नमः। स्वरायै॰। ततस्त्रिकोणाद्बहिः। दक्षिणे कालाय नमः। वामे मृत्यवे नमः। त
तस्त्रिकोणाधोभागे दक्षिणे सिंहाय नमः। वामे महिषाय॰॥ पुनस्त्रिकोणमध्ये
मिथुनत्रयस्य पृष्ठे रुद्राय नमः। गणपतये॰। पुनस्त्रिकोणाद्बहिः उपरिभा २४
गे आधाराय नमः। वामे कूर्माय नमः। दक्षिणे अनंताय॰। ततः महालक्ष्म्यां
गपूजा। मध्ये ऊं चपलायै नमः। पादौ पूजयामि। ऊं चंचलायै नमः। जानुपू

© Dharmartha Trust J&K. Digitized by eGangotri

जघा मि। कमलायै०। कटिं०। कात्यायन्यै०। नाभिं०। जगन्मात्रे०। जठरं०। विष्णुवल्ल
भायै०। वक्षस्थलं०। कमलवासिन्यै०। भुजद्वयं०। पद्मकन्यायै०। हस्तद्वयं०। कंबुकंठि
न्यै०। कठं०। सुस्मितायै: मुखं०। कमलपत्राक्ष्यै०। नेत्रत्रयं०। श्रियै०। शिरः०। ततः
पीठाद्बहिः अष्टदिक्षु क्रमेण चतुःषष्टियोगिनीः पूजयेत्। श्वेतवर्णास्त्रिशूलखड
मरूपाशांकुशधराः पूर्वे। जयायै०। गणेश्वर्यै०। विजयायै०। सिद्धयोगिन्यै०। जयं
त्यै०। महामायै०। अपराजितायै०। दिव्ययोगिन्यै० ८ गौरवर्णा अक्षमालांकुशसु
वर्णपुस्तककराः। आग्नेये। श्वेतायै नमः। डाकिन्यै०। काल्यै०। कालरात्र्यै०। हुं
कार्यै०। रौद्र्यै०। वेताल्यै०। जंकार्यै० ८। रक्तवर्णाज्वालाशक्त्यभयवरकराः।
दक्षिणे। ऊर्ध्वकेशिन्यै०। विरूपाक्ष्यै०। शुष्कांगिन्यै०। नरभोजनायै०। फट्कारि
कायै०। भद्रायै०। धूम्रांगायै०। कलहप्रियायै० ८। विद्युद्वर्णाध्वजबाणधनुः
पाशहस्ताः। नैर्ऋत्यां। घोरायै०। रक्ताक्ष्यै०। विश्वरूपायै०। भयंकर्यै०। वीरायै०।
कुमारिकायै०। वाराह्यै०। मुंडधारिण्यै० ८। रक्तोत्पलवर्णाः कमलखड्गमालाभ
यवरकराः पश्चिमे। भैरवायै०। द्वविण्यै०। धूम्राक्ष्यै०। प्रेतभोजनायै०। खड्गांग

© Dharmartha Trust J&K. Digitized by eGangotri

धारिण्यै० । दीर्घायै० । मालिन्यै० । मंत्रयोगिन्यै० ८ । धूम्रवर्णाः शंखचक्रगदापद्मधराः । वायव्यां ॥
कालिन्यै नमः । चक्रिण्यै नमः । कंकाल्यै० । भुवनेश्वर्यै० । कोटक्यै० । महामायै० । यमदूत्यै० । क
पालिन्यै० ८ ॥ अंजनवर्णाः खड्गखेटकपरशुपाशहस्तास्तत्र रे ॥ केशिन्यै नमः । मथिन्यै० । रो
मजंघायै० । प्रेतचारिण्यै० । विशालाक्ष्यै० । कार्मुक्यै० । लोल्यै० । अधोमुख्यै० ८ । धूम्रवर्णाः कुं
तखेटकपरिघभिंडिमालधराः । ईशाने । मुंडाग्रधारिण्यै नमः । व्याघ्र्यै० । रोहिण्यै० । प्रेतभू
षण्यै नमः । धूर्जटिन्यै० । मायै० । कालिकायै० । विश्वलंबिन्यै० ८ ॥ इति चतुःषष्टियोगिनीपू
जा ॥ अथ चतुःषष्टिभैरवपूजा ॥ तत्रैव । अष्टाष्टगुणितास्त्वेव भैरवाणां महागणाः ॥ स्वर्ग
पातालमर्त्येषु विचरंति महाबलाः । योगिनीनां गणैः सार्द्धं पूजयेद्भैरवं गणं । योगिनीनां
यथाध्यानं तथा तेषां भवेन्नृप ॥ पूर्वे । शंभवे० । नीलकंठाय० । विशालाक्षाय० । मार्तंडा
य नमः । मत्तप्रनाय० । स्वच्छंदाय० । असिताय० । कुष्टाय० ८ ॥ आग्नेये । खेचराय० ॥
संचराय० । विरूपाय० । विरूपाक्षाय० । नानारूपधराय० । पराय० । कंदवर्णाय० ॥ १५
सुधागात्राय० । दक्षिणे । उन्मत्तभैरवाय० । मेघनादाय० । मनोवेगाय० । क्षेत्रपाला
य० । विषापहाय० । निर्भयाय० । वेगिताय० । प्रेताय० ८ । नैर्ऋत्ये । लोकपालभैरवा

© Dharmartha Trust J&K. Digitized by eGangotri

य०। गदाधराय०। वज्रहस्ताय०। महाकालाय०। प्रचंडाय०। प्रजयाय०। अंतकाय०। त्रा
मकाय०८ पश्चिमे। भीषणाय नमः। संहाराय०। कुलपालाय०। चंडपालाय०। प्रजापाला
य०। रक्तांगाय०। वेगवीक्षणाय०। असूपाय०८। वायव्यां। धरापालाय नमः। कुंडलिने०।
मंत्रायकाय०। रुद्रपितामहाय०। विष्णवे०। बटुकनाथाय०। भूतनाथाय०। वेतालाय०।
८। उत्तरे। त्रिनेत्राय०। त्रिपुरांतकाय०। वरदाय०। पर्वतवासाय०। शशिशकलभूषणाय०।
सर्वज्ञाय०। सर्वदेवमयाय०। ईशानाय०। ८। ईशान्यां। सर्वभूतहृदिस्थाय०। घोरसायकाय०।
भयंकराय०। भुक्तिमुक्तिप्रदाय०। कालाग्नये०। महारौद्राय०। भयानकाय०। दक्षिणामि
मुखस्थिताय०८। इति चतुःषष्टिभैरवपूजा॥ ॥इति पूजा समाप्ताः॥ ॥अथ वाशारदा
तिलके अन्यानि सप्तावरणानि स्पष्टः॥ तद्यथा॥ षट्सु कोणेषु पूर्वत आरभ्य ईशानकोण
पर्यंतं मंत्रैः प्रथमावरणं॥ ॐ क्रां हृदयाय नमः॥ ॐ क्रीं शिरसे०। ॐ क्रूं शिखायै०। क्रैं कवचाय०।
क्रौं नेत्रत्रयाय०। क्रः अस्त्राय फट् इति॥ ततो द्वितीयावरणं॥ पूर्वपत्रकेसरयोः अका
राय नमः॥ आकारा०। अग्निपत्रकेसरयोः॥ इकाराय०। ईकारा०। दक्षिणपत्रकेसर
योः॥ उकारा०। ऊकाराय०॥ नैर्ऋतिपत्रकेसरयोः॥ ऋ ॠकारा०। लृकाराय०। पश्चिम

© Dharmartha Trust J&K. Digitized by eGangotri

पत्रकेसरयोः।ऌकाराय॰।ॡकाराय॰।वायुपत्रकेसरयोः।एकाराय॰।ऐकाराय॰।।
उत्तरपत्रकेसरयोः।ओकाराय॰।औकाराय॰।ईशपत्रकेसरयोः।अनुस्वारायनमः।।ऽ
विसर्गायनमः।।इतितृतीयावरणं।।पूर्वपत्रेकादिवर्गायनमः।आग्निपत्रेचादिवर्गाऽ
य॰।दक्षिणपत्रेटादिवर्गाय॰।नैर्ऋतिपत्रेतादिवर्गाय॰।पश्चिमपत्रेपादिवर्गाय॰।वाऽ।
युपत्रेयादिवर्गाय॰।।उत्तरपत्रेशादिवर्गाय।।इतितृतीयावरणं।।ततःपूर्वादिषट्ऽ।
पत्रेऽग्रेषुव्यापिनीपालिनीपाविनीक्लेदिनीधारिणीमालिनीहंसिनीशांतिनीइत्येऽ।
ताऽष्टौशक्तीः पूजयेत्।।इतिचतुर्थमावरणं।।ततस्तदुपरिपूर्वादिक्रमेणब्राह्मीमा
हेश्वरीकौमारीवैष्णवीवाराहीइंद्राणीचामुंडामहालक्ष्मीरित्यष्टौविश्वमातॄःपूजयेत्।
।।इतिपंचमावरणं।।ततइंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानंतब्रह्मणोद
शदिक्पालान्पूजयेत्।।इतिषष्ठमावरणं।।ततोवज्रशक्तिदंडखड्गपाशध्वज
गदात्रिशूलचक्रांबुजानिदिकपालास्त्राणि।।पूजयेत्।।इतिसप्तमावरणं।।ततःपुष्पां १६
जलित्रयंदत्वाप्रथमदिनेदशकुमारीभोजनसंकल्पः।।दशविप्रभोजनसंकल्पंकु
र्यात्।।द्वितीयदिनेविंशतिकुमारीविंशतिविप्रान्।तृतीयेत्रिंशत्कुमारीत्रिंशद्विप्रान्।।

© Dharmartha Trust J&K. Digitized by eGangotri

चतुर्थे चत्वारिंशत्कुमारी चत्वारिंशद्विप्रान्॥ द्विगुणैश्चंदनपुष्पादिभिश्च पूजा॥ अस्य
कृतस्य चंडिकापूजनकर्मणो यं॰ चंडिकाप्रसादात्॥ सर्वं परिपूर्णमस्तु॥ अस्य
स्तु॰ नमः॥ प्रसादात्कुर्वतां कर्म॰॥ आवाहनं न जा॰ इति प्रार्थयेत्॥ ॥इति दुर्गा
पूजा समाप्ताः॥ प्रथमे दिवसे दश विप्राणां एकैकं चंडीपाठं कुर्युः॥ द्वितीये द्वौ द्वौ॥
तृतीये ३ चतुर्थे ४ एवं दिनवृध्या चंडीपाठवृद्धिः॥ एतानि सप्तावरणानि लिखितानि
शारदातिलकात्॥ तथाहि॥ अंगैरावरणं पूर्वं द्वितीयं युग्मशः स्वरैः अष्टवर्गैस्तृतीयं
स्यात्तच्छक्तिभिरनंतरं॥ पंचमं मातृभिः प्रोक्तं षष्ठं लोकेश्वरैः स्मृतं। लोकपालायुधैः प्रोक्तं व
ज्राद्यैः सप्तमं तथा। व्यापिनी मालिनी पश्चात्प्लाविनी क्लेदिनी तथा। धारिणी मालिनी तू
र्योद्दंसिनी शंखिनी तथा॥ एता पत्रेषु संपूज्या धृताक्तगुणपुस्तकाः॥ ब्राह्मी माहेश्वरी तू
र्यः कौमारी वैष्णवी तथा॥ नारायन्यनंतरं इंद्राणी चामुंडा सप्तमं ततः॥ अष्टमी स्यान्महा
लक्ष्मी प्रोक्ता स्युर्विश्वदुर्गा इति॥ इति चतुर्थदिनपर्यंतं कृत्यं॥ पंचमे दिवसे प्रातर्हो
मं कुर्याद्विधानतः॥ इति देवीचरित्रे रुद्रयामलीयवचनात्पंचमेह्निप्रातर्होममारभे
त्॥ ॥छ॥ ॥अथ पंचमेह्नि होमविधिः॥ ॥दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रियां ॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवां ॥ १ ॥ मंगलां शोभनां शुद्धां निष्कलां परमां
कलां ॥ विश्वेश्वरीं विश्वपूज्यां चंडिकां प्रणमाम्यहं ॥ २ ॥ सर्वदेवमयीं देवीं सर्वरोग
भयापहां ॥ ब्रह्मेशविष्णुनमितां प्रणमामि सदाशिवां ॥ ३ ॥ विंध्यस्थां विंध्यनिल
यां दिव्यस्थाननिवासिनीं ॥ योगिनीं योगजननीं चंडिकां प्र० ॥ ४ ॥ ईशानमातरं
देवीमीश्वरीमीश्वरप्रियां ॥ प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं ॥ ५ ॥ य इ
दं पठति स्तोत्रं शृणुयाद्वापि यो नरः ॥ स मुक्तः सर्वपापेभ्यो दुर्गया सह मोदते ॥
॥ ६ ॥ ॥ इति नमस्कारः ॥ ॥ छ ॥ इति शतचंडीविधानं पूजापद्धतिः समाप्तः ॥
॥ ॥ ॥ ध्वजो वज्रं तथा पद्मं अंकुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च षट्कोणं च तथैव
हि ॥ १ ॥ इति दक्षिणचर्णे ॥ इंद्रचापं त्रिकोणं च कलशं चार्द्धचंद्रकं ॥ अंबरं मत्स्यचिह्नं च
गोःपदं सप्तमं स्मृतं ॥ २ ॥ जंबूफलसमाकारं षोडशं पचकुत्र वा । षोडशैव तु चिह्नानि म २७
याद्दृष्टानि तत्पदे ॥ ३ ॥ ॥ इति वामचर्णे ॥ ॥ इति ब्रह्मांडपुराणात् ॥ ॥ संवत् १७
॥ ७४ वर्षे वैशाखवदि १० शुक्रे लेखः ॥ ॥ द्विवेदि नवानीशंकरात्मज देवशर्मेण लिखितं ॥

© Dharmartha Trust J&K. Digitized by eGangotri